# पाठ- ३

# आरोग्यं परमं सुखम्

**सारान्शः**

नित्यं तैलमर्दनेन शिरोवेदना न जायते । केशाः कृष्णाः भवन्ति । केशानां मूलानि दृढानि भवन्ति। तैलमर्दनेन कण्ठः न शुष्यति, ओष्ठयोः स्फुटनाद् भयं दूरीभवति, दन्ताः च दृढमूलाः भवन्ति ।शिरसि तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि भवन्ति । निद्रा सरलतया आयाति । नित्यम् अभ्यङ्गात् नरः बलवान् प्रियदर्शनः च भवति । पादयोः तैलमर्दनेन पादौ दृढौ भवतः, दृष्टिः तीव्रा जायते, वायुजनितः रोगः च न भवति।

**मुख्य बिन्दवः**

चरकः आयुर्वेस्य प्राचीनविद्वत्सु चरकः अन्यतमः अस्ति। सः राज्ञः केनिष्कस्य शासने राजवैद्यरूपेण उषितवान् । मूलतः तु अयं गान्धारवासी आसीत् । अस्य कालः ईसापूर्वं प्रथमशताब्दी इति मन्यते । चरकस्य यशः भारतात् बहिः अपि प्रसृतम् । कविराजचरकस्य विषये सत्यमुक्तम्–'चरकस्तु चिकित्सते।'

चरकसंहिता- चरकस्य आयुर्वेदीयः ग्रन्थः अस्ति । अयं सर्वप्रथमः सर्वश्रेष्ठः च कायचिकित्सायाः ग्रन्थः वर्तते । सहस्रवर्षेभ्यः आयुर्विज्ञानस्य मूलं स्रोतः चरकसंहिता एव अस्ति । अयं ग्रन्थः अष्टभागेषु त्रिंशत्सु अध्यायेषु च विभक्तः । ग्रन्थे गद्यस्य पद्यस्य च उभयोः प्रयोगः कृतः। आयुर्वेदक्षेत्रे तु अयं ग्रन्थः ईदृशः लोकप्रियः जातः यत् अष्टभ्यां शताब्दयाम् एव अस्य अनुवादः अरबीभाषायां जातः । फारसीभाषायाम् अपि अनुवादः उपलभ्यते । पाठेऽस्मिन् प्रस्तुतः अंशः सूत्रस्थानस्य पंचम-अध्यायात् संकलितः ।

**अवगच्छामः**

गृहे अनेकानि वस्तूनि दृश्यन्ते यथा गैसचुल्लः, सीवनयन्त्रं, तालकं नलम् इति । एतेषां सम्यक् चालनाय तैलप्रदानम् अनिवार्यं भवति । एतेषां सन्धिस्थलेषु यदि तैलं न दीयते तदा एतानि सम्यक् कार्यं न कुर्वन्ति कुण्ठितानि च भवन्ति । अस्माकं शरीरम् अपि एकं यन्त्रम् इव । कालिदासेन सत्यमुक्तम्- "शरीरमाद्यं खलु धर्मसाधनम्।" शरीरस्य इन्द्रियाणि - नासिका, कर्णः, त्वक्, नेत्रे, हस्तौ पादौ च सुदृढानि भवेयुः तदर्थं तैलमर्दनम् आवश्यकम्। नूनं तैलमर्दनेन स्वास्थ्यं वर्धते । स्वास्थ्यम् एव परमं प्रथमं सुखम् । आयुर्वेदे तैलमर्दनस्य महत्त्वं सुस्पष्टं वर्तते चरकः आर्युवेदस्य सर्वश्रेष्ठः विद्वान् अभवत् ।

**आवश्यकोऽयं ज्ञानम्**

- **तैलमर्दनम् -** न कर्णरोगाः वातोत्थाः नमन्याहनुसंग्रहः । नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात् ।।
- **पादाभ्यङ्गः**:- खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः । सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात्।। न च स्याद् गृध्रसीवातः पादयोः स्फुटनं न च । न शिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः ।।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**यण्सन्धिः**- यण् = य् व् र् ल् एते चत्वारः वर्णाः यण् कथ्यन्ते ।




| | | | |
|---|---|---|---|
| इ + अ = इ > य् | प्रत् इ + अ ङ्गम् | प्र त् य् अङ्गम् | प्रत्यङ्गम् |
| ई + आ = ई > य् | नद् ई + आ गमः | न द् य् आगमः | नद्यागमः |
| उ +अ =उ > व् | मध् उ + अ रिः | म ध् व् अ रिः | मध्वरिः |
| ऊ + इ = ऊ > व् | मध् ऊ + इ दम् | म ध् व् इ दम् | मध्विदम् |
| ऋ + इ = ऋ > र् | मात् ऋ + इ च्छा | मा त् र् इच्छा | मात्रिच्छा |
| ऋ +आ = ऋ > र् | पित् ऋ + आ ज्ञा | पि त् र् आ ज्ञा | पित्राज्ञा |
| लृ +अ = लृ > ल् | लृ + अ र्थम् | ल् अ र्थम् | लर्थम् |

2. **गुणसन्धिः**- अ (अर् अल) ए, ओ अ/ आ + इ/ ई = 'ए' भवति ।




| | | |
|---|---|---|
| अ + इ = ए | घर्म् अ+इन्द्रः | धर्मेन्द्रः |
| अ + ई = ए | दिन् अ+ईशः | दिनेशः |
| आ + इ = ए | मह् आ+इन्द्रः | महेन्द्रः |
| आ + ई = ए | मह् आ+ईशः | महेशः |
| अ + उ = ओ | भाग्य् अ+उदयः | भाग्योदयः |
| अ + ऊ = ओ | जल् अ+ऊर्मिः | जलोर्मिः: |
| आ + उ = ओ | गङ्ग् आ+उदकम् | गङ्गोदकम् |
| आ + ऊ = ओ | मह् आ+ऊर्मिः | महोर्मिः |

**3. पूर्वरूपसन्धिः** यदि पदान्ते ए / ओ वर्णः भवेत् पश्चात् 'अ' ह्रस्व अकारः भवेत् तर्हि पूर्व-परयोः स्थाने ए + ऊ = 'ए', ओ + ऊ = ओ इति पूर्वरूपः एकादेशः भवति । अकारस्थाने च 'ऽ' चिह्नम् प्रयुज्यते ।

पूर्वरूपसन्धि के नियम

नियम- ए,ओ, वर्ण के बाद यदि अकार या आकार हो तो दोनों के स्थान पर पूर्वरूप एकादेश होता है।
मध्ये अर्द्धाकारः (ऽ)आगच्छति। अर्थात्

| | |
|---|---|
| ए + अ = ए | ए+ आ = ए |
| ओ+ अ = ओ | ओ + आ = ओ |
| मुने+अत्र= मुनेऽत्र | नरे+अस्मिन्= नरेऽस्मिन् |
| सेवते + अशोकः= सेवतेऽशोकः | नगरे+अस्मिन्=नगरेऽस्मिन् |
| प्रभो+अत्र= प्रभोऽत्र | नगरे+अपि=नगरेऽपि |
| बालो +अवदत्=बालोऽवदत् | पठतो+अद्य=पठतोऽद्य |

**मतुप् प्रत्ययः**-हिन्दी भाषायां 'वाला' इति अर्थे मतुप् प्रत्ययः प्रयुज्यते । 'मतुप्' इति प्रत्ययस्य 'मत्' इति शेषः भवति । यदि शब्दस्य अन्ते अ/आ भवति तर्हि मत् इति स्थाने 'वत्' भवति बल + मतुप्।

## योग्यतां वर्धयत

तैलाभ्यङ्गेन लाभाः-




**पाठ संप्रेष्यः**

- तैलाभ्यङ्गेन शरीराङ्गानि दृढानि भवन्ति । अतः तैलमर्दनं नित्यं कर्तव्यम् ।
- शिरसि तैलनिषेवणात् शिरः शूलम् न जायते। केशाः च दृढमूलाः भवन्ति ।
- पादयोः तैलमर्दनेन सौकुमार्य, बलं स्थैर्य च जायते ।
- तैलाभ्यङ्गेन ओष्ठयोः स्फुटनं न भवति दन्ताश्च दृढमूलाः भवन्ति ।
- 'मतुप्' (मत्) तद्धितप्रत्ययः अस्ति । 'अस्ति अस्य' इति विग्रहे 'मतुप्' भवति

## अधिकाङ्कानाम् अर्जनं कथं भवेत्

- पद्यानां सम्यक् रूपेण अध्ययनं कृत्वा तेषाम् अर्थम् अवगच्छेत्।
- पद्येषु आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- पद्यानां समानार्थी पद्य सूक्तयः अपि जानीयात्।

## स्व मूल्याङ्कनम् कुरुत

- श्लोकानां अर्थम् अवगम्य तेषां समानार्थी श्लोकानामन्वेषणं कृत्वा भावानां मेलन कुरुत।
- यण, गुण, पूर्वरूप सन्धिनां परिभाषा उल्लेखः च कुरुत।
- मतुप् प्रत्ययस्य प्रयोगेण नूतन शब्दानां निर्माणं कुरुत।